O/C

# S-III/5/2224A/21

## षष्ठसत्रार्द्धम्

## पञ्चमपत्रम्

## साहित्यम्

पूर्णाङ्काः 80

समयः घण्टात्रयम्

(15×2=30)

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।

1. 'रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद् व्यवहारः' इति केनोक्तम्?
2. किं नाम सत्त्वम्?
3. काव्यं कतिविधम्?
4. ध्वनिकाव्यस्य लक्षणं किम्?
5. अविवक्षितवाच्यस्यापरं नाम किम्?
6. विवक्षितान्यपरवाच्य-इत्यत्र अन्यपरशब्देन किं ज्ञायते?
7. अविवक्षितवाच्यस्य भेदद्वयं लिखत।
8. कदली कदली – इत्यत्र द्वितीयकदलीशब्दस्यार्थः कः?
9. 'निःश्वासन्ध इवादर्शश्चन्द्रमा न प्रकाशते' इति कस्य उदाहरणमस्ति?
10. जहत्स्वार्था कस्मिन् ध्वनौ वर्तते?
11. तत्राद्यो रसभावादिरेक एवात्र गण्यते – अत्र रसभावादिपदेन केषां ग्रहणं भवति?

**अथवा**

रसः अनुकार्य्यगत इति कस्य कथनमस्ति?

12. कस्य स्थायिभावः रसरूपताम् प्राप्नोति?

**अथवा**

ब्रह्मास्वादसहोदरः कः?

13. निर्वेदः कस्य स्थायी भावः?

**अथवा**

वाच्यादनुत्तमे व्यङ्ग्ये कीदृशं काव्यं भवति?

14. अङ्कानां वामतो गतिरिति न्यायेन 'वेदखाग्निशराः' इत्यस्यार्थं लिखत।

**अथवा**

वाक्यगतस्य अत्यन्ततिरस्कृतवाच्यस्य उदाहरणं लिखत।

15. अर्थान्तरसंक्रमितवाच्ये का लक्षणा भवति ?

**अथवा**

विरोधाभासाऽलङ्कारध्वनेः उदाहरणं किम् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. रसस्यानुकार्यगतत्वं यथाग्रन्थं खण्डयत।

**अथवा**

रसस्याऽनुकर्तृगतत्वं यथाग्रन्थं निराकुरुत।

17. रसस्वरूपं विशदयत।

18. वाक्ये शब्दार्थशक्त्युत्थः–इति सोदाहरणं प्रतिपादयत।

19. काक्वाक्षिप्तं गुणीभूतव्यङ्ग्यं सोदाहरणं निरूपयत।

**अथवा**

तुल्यप्राधान्यं गुणीभूतव्यङ्ग्यं सोदाहरणं निरूपयत।

20. भ्रम धार्मिक.............इति पद्ये विपरीतलक्षणां निराकुरुत।

**अथवा**

अर्थान्तरसंक्रमितवाच्यध्वनिं सोदाहरणं निरूपयत।

**स. दीर्घोत्तरीयप्रश्नः समाधेयः।** (1×20=20)

21. रसस्यालौकिकतां प्रतिपादयत।

**अथवा**

'तदष्टादशधा ध्वनिः' इति विस्तरेण विचारयत।